तार्किक मोह प्रकाश:

वैशेषिक न्याय नवीनार्य्य मतादि
खण्डन रूप:

परमहंस परिव्राजक श्री ब्रह्मान
न्द तीर्थ बिरचित: प्रकाशितश्च

तदनुज्ञया
पण्डित काशीनाथशर्म्मणा सं
शोध्य निज [भारतदर्पण]यन्त्रे
[इन्द्रप्रस्थे] मुद्रित:

वैक्रमीयाब्दे १९४७ कार्तिके
प्रथमे १००० मूल्य प्रतिपुस्तक ≤)

भारतदर्पण प्रेस दिल्ली मुहल्ला शामिलो में पण्डितकाशीनाथ शर्मा के प्रबन्ध से छपा

प्रस्तावना

—+—

अत्र कश्चिद्दाक्षिणात्यः शमादि गुण सम्पन्नः सर्व विद्यापारङ्गतः शारीरकसूत्र वृत्ति भुवनेश्वरी तिलकाद्यनेक ग्रन्थ रचना निपुणः परमहंस परिव्राजक श्रीब्रह्मानन्द तीर्थाभिधः पृथिवीं पर्य्यटमानः कदाचिज्जम्बूनगरम्प्रविश्य सुखेनोवास तत्र कैश्चिन् न्याय मदिरोन्मत्तैःन्यायशास्त्रं युक्तियुक्तं वेदान्त मीमांसा शास्त्रं युक्ति रहितमिति प्रलपितमुक्तं स्वामिना श्रुतन्ततस्तेन पूर्वं स्ववपुरेपि श्रुतमिदम्वचनमिति मनसि सञ्चिन्त्य तेषां न्याय मधुपान जन्य महामोह शान्तये अयं तार्किक मोहप्रकाशाख्योग्रन्थोरचितः अत्र सर्व साक्षिभूतं वेदान्त प्रसिद्धमेकं शुद्धचैतन्यं सत्यमन्यन्मिथ्येति ग्रन्थकृन्मतं तत्सिद्धये परमाणुवादाऽसत्वं तत्प्रसङ्गाज्जीव भिन्नेश्वराऽसत्वं न्यायमत प्रसिद्ध न्यायानामाभासत्वं सत्कार्य्यासत्कार्य्यवादयोराभासत्वमर्थादनिर्व्वचनीय वादस्योत्कर्षत्वं आकाशस्योत्पत्तिमत्वं तत्प्रसङ्गादात्मनः स्वतः सिद्धत्वं आत्मनोविभुत्वनानात्व वादिमते सुखदुःख साङ्कर्य्यादि दोषाऽनिर्म्मोक्षत्वञ्च प्रदर्शितमितिशुभम् ॥

परमहंस परिव्राजक
श्री ब्रह्मानन्द तीर्थः

शुद्धिपृष्ठम्

अशुद्ध	शुद्ध	पृ०	पं०
म्यु	भ्यु	६	१
क	कः	६	६
त्य	व्यः	६	७
रा	रो	७	५
जा	जो	८	१
द्वा	द्वो	८	१
र्गी	र्मीः	८	६
त	त्त	८	८
ला	लो	८	३
व	त्वं	१०	६
प्य	त्प्प	१०	७
एक	एकत्व	१०	१३
म्र	म्रा	१०	१३
त्व	त्वा	११	५
दुनि	दुर्नि	११	८
प्र	प्य	१२	१३
त्स	त्म	१५	११
ब्य	व्या	१५	११
इत्येब	इत्येवं	१७	६
द्वः	द्वेः	२१	१४
त्वं	वत्वं	२२	१६
पते	पत्तेः	२३	१७
सा	स्य	२७	१४
सा	सो	२८	११
त्ता	त्तां	२८	११
प्या	व्या	३०	१५
प्राप्ति	प्राप्तिः	२४	४
न्व	त्वा	३६	१६
तर्व	वर्त	३६	१७
प्रत्य	प्रत्य	३७	३
वत्र	वर्त	३७	१०
त्येषा	न्येषा	३७	११
त्व	त्वा	३८	४
भवति	स्यात्	३८	१७
प्यु	प्ययु	४७	१६

अथ तार्किक मोह प्रकाशः

—*—

नत्वा गुरुपदाम्भोजं ब्रह्मविद्यां विभाव्य च। तार्किकाणां महामोहः सङ्क्षेपेण प्रकाश्यते १ ॥

इह खलु तार्किकाः प्रलयकाले विभक्ताः परमाणवः निश्चेष्टा आकाशे वर्त्तन्ते प्रलयावसाने सर्गादौ द्वाभ्याम्परमाणुभ्यां द्व्यणुकं त्रिभिर्द्व्यणुकैस्त्र्यणुकमिति द्व्यणुकादिक्रमेण परमाणुभिर्जगदारभ्यतइति प्रलपन्ति।

अत्र वदामः प्रलये विभक्तानां परमाणूनामन्यतर कर्म्मणोभयकर्म्मणावा सयोगोवाच्यः कर्मणश्च दृष्टन्निमित्तं प्र

यत्नादिकम्वाच्यम् यथा प्रयत्नवदात्म संयोगाद्देहचेष्टा वाय्वाद्यभिघाताद्वृत्तच लनं तद्वत्परमाणुकर्म्मणोदृष्टन्निमित्तम भ्युपगम्यते वा नवा नांत्य: परमाणुष्वा द्यक्रियारूपकार्य्यासम्भवात् नाद्य: प्रय त्नादे:सृष्ट्युत्तरकालीनत्वेन आद्यक्रिया जनकत्वायोगात् ।

ननुदृष्टनिमित्तासम्भवेपि जीवादृष्ट स्यनिमित्तत्त्व सम्भवादितिचेन्न । अस म्बद्धस्य तस्य निमित्तत्त्वायोगात् जड त्वेन प्रवर्तकत्वाऽयोगाच्च ।

ननु अदृष्टवदात्मसंयोगस्य निमित्त त्त्वमितिचेन्न । विभुसंयोगस्याणुषुसदा सत्वात् प्रलयाभावप्रसङ्ग: ।

ननु जीवाधिष्ठता दृष्टन्निमित्तमि तिचेन्न । प्रलयकाले अनुत्पन्न चैतन्य स्यजीवस्य जडत्त्वेनाधिष्ठातृत्त्वायोगात्

ननु ईश्वरेच्छाया: निमित्तत्वमिति चेन्न । तस्या:नित्यत्त्वेन कादाचित्क प्रवर्तकत्त्वायोगात् ।

ननु ईश्वरेच्छाया: सृष्टिस्थितिप्रलयनियतकालविषयकैकाकारतया कादाचित्क प्रवर्त्तकत्वसम्भवादिति चेन्न। विकल्पासहत्वात् तथाहि यस्मिन्काले सृष्टीच्छातस्मिन्काले प्रलयेच्छावर्तते वा नवा नाद्य: सृष्ट्यभावप्रसङ्गात् । नान्त्य: अनित्यत्वप्रसङ्गात् किञ्चत्वदभिमतैतादृशेच्छासत्वेप्रमाणाभावात् प्रत्युतयद्ज्ञानन्तन्मनोजन्यं याइच्छा सामनोजन्या इतिव्याप्त्यानुगृहीतसोकामयतेत्यादिश्रुतिविरोधेन नित्य ज्ञानेच्छाद्यसिद्धेश्च ।

नन्वस्त्वीश्वरेच्छाया अनित्यत्वन्तथाप्यणुकर्मनिमित्तत्त्वसम्भवादितिचेन्न । अपसिद्धान्तापत्त :अशरीरत्त्वामनस्कत्वे

नजन्यज्ञानाद्यनुपपत्तेश्चकिञ्च ईश्वरो
स्तिनवेति संशयेन तदीयेच्छा निमित्त
क परमाणुप्रवृत्ते र्दूरनिरस्तत्वात् तथा
हि ईश्वरोनास्तिप्रमाणाभावाद्वन्ध्यापु
त्रवत् ।

ननु क्षित्यङ्कुरादिकङ्कर्तृजन्यङ्कार्य्य
त्वाद्घटवदित्यनुमानस्यानिर्दिष्टत्वा
व्याप्तिज्ञानाभावे नानुमानाप्रवृत: तथा
हियद्यप्यङ्कुरादौजीव:कर्तानभवति तथा
पिजीवाद्भिन्नस्य घट वदचेतनत्वनियमा
दन्य: कर्ता नास्त्येवेति व्यतिरेकनिश्च
यात् यत्कार्य्यन्तत् सकर्तृकमिति व्या
प्तिज्ञानासिद्धयानुमाना प्रवृत्ति: किञ्च
घटादौ व्याप्तिग्रहणकालेतदुत्पत्तिस्था
नात्परितोवर्तमान तृणांकुरादौतत्कर्तु
रप्रत्यक्षत्वे न तार्किकाणां बुद्धिमतांबु
द्धौकथंव्यभिचार बुद्धिर्नोत्पन्नेति महदा

स्वर्ग्यं यदिकिञ्चित्स्थले व्याप्तिं गृहीत्वा सर्वत्रानुमीयते तर्हि त्रित्यङ्कुरादिक न्दण्डचक्रादिव्यापार जन्यङ्कार्य्यत्वाद्घट वदित्याद्यनुमितेर्दुर्निवारत्व स्यात् कि ञ्चसुख समवायिकारणस्यात्मनः सुखा दिकर्तृत्वासंभवेन कर्तृजन्यत्वाऽभावव तिसुखादौ कार्य्यत्व हेतोर्विद्यमानत्वे नव्यभिचारात् अन्यथाऽभिन्ननिमित्तो पादानत्व स्वीकारापत्तेः न चेष्टाप त्तिरपसिद्धांतापातात् नहि इदमीश्व रकर्त्तृकन्तस्यासिद्धत्वेनान्योन्याश्रयता पत्तेः अतकेचिच्छास्त्रसँस्कारशून्याआ धुनिकाःदयानन्दिनःप्रजल्पन्तिघटादि कार्ये जीवः; कर्ताद्दष्टः वृक्षाभिघातपर्व तशिखरपतनादौ वायुआदीनाङ्कर्त्तृत्व न्दृष्टन्तद्वत्सकल प्रपञ्चकर्तेश्वरोभवितु मर्हतीति तत्तुच्छं जडस्यकर्तृत्वाभ्युप

गमेलाघवात् मूलप्रकृतेरेवक ल्पनास्युप गमेनवन्ध्यापुत्रतुल्य श्वराभ्युपगमस्य वैयर्थ्यापत्ते: किंच ईश्वर; सच्चिदानन्द रूप;निराकार;सर्वशक्तिमान्, न्यायकारीदयालु;अजन्माअनन्तोनिर्विकारोनादिरनुपम;सर्वाधारस्सर्वेश्वर;सर्वव्यापक सर्वान्तर्य्याम्यजर; अमर; अभय; नित्य पवित्र;सृष्टिकर्ताचेतिप्रलपन्ति तदपेशलम् यत्रव्यर्थविशेषणानिबहूनि सन्ति तेषांस्तुल्यर्थत्वेनोपपत्तावपि सच्चिदानन्दरूपत्व निर्विकारित्व सर्वशक्तिमत्व न्यायकारित्व दयालुत्व निराकारत्व स्रष्टृत्व कत्व विशिष्टेश्वरव्यक्ते; शशविषाण कल्पत्वात् तथाहि ईश्वरस्यसच्चिदानन्द रूपत्वेनैव साकारत्व सिद्धौ निराकारत्व विशेषणासंभव; किंच निराकारस्य स्रष्टृत्वं सर्व शक्तिमत्वन्न्यायकारित्व न्दयालुत्वंचात्यन्तमसङ्गतम् निराकारेव

न्व्याप्युत्वेप्येताद्दश विशेषणस्योन्मत्तै रु
क्षेचित्तुं शक्यत्वात् किंच यच्चशत्रुमि
त्रपुत्रादीनां शिक्षा रक्षारूपन्यायकारि
त्वन्तत्र परदु:ख प्रहरणेच्छारूप दयालु
त्वा संभवात् प्राणमनश्शरीर शून्य
स्य ताद्दशधर्म्मवत्वं मन्दबुद्धीनां वँच
नायैव प्रजल्पितन्नास्तिकशिरोमणिना
दयानन्देनेति बुद्धिमताबोद्धव्यम् किँच
एतेधर्मा;निराकारे सच्चिदानन्दरूपे स
त्यांशेवर्त्तंते उत चिदंशे आहोस्विदान
न्दांशे अथवाअंशत्रयेपि नाद्य; घट:स
न्नित्यत्र सत्यांशेन्यायकारित्वादि धर्मा
णामदर्शनेन दृष्टविरुद्धकल्पनस्योन्मत्त
प्रलापकल्प्यत्वात् सत्त्यत्वस्यापि व
स्तुधर्मत्वेन प्रतीयमानत्वात् धर्मेध
र्माभावादिति न्यायविरोधेनतत्रतत्क
ल्पनायोगाच्च नद्वितोयस्ततोयौ घटोय

मितिज्ञानेभोगानन्दादौ च न्यायकारि
त्वादीनामदर्शनेनोक्तदोष तुल्यत्वा
त् नचतुर्थः अंशत्रयवत; सच्चिदानन्दस्व
रूपिणोधर्मिणोप्रसिद्धया तद्धर्मस्याप्यप्र
सिद्धेः नन्वहमस्मि ज्ञातानन्दवानित्या
दिनाप्रतीयमानेवस्तुनिन्यायकारित्वा
दयोधर्माःप्रत यन्तइतिचेत्सत्यम प्रती
यन्तेसत्यज्ञानानन्दविशिष्टे वस्तुनिजी
वेनतुसच्चिदानन्दस्वरूपे तदभावस्यप्रद
र्शितत्वात् ननुजीवःसच्चिदानन्दरूपः
कालत्रयानुसन्धायित्वेन सद्रूपत्वस्य ई
श्वरादि सकलपदार्थसद्भावासद्भाव सा
क्षित्वे नचिद्रूपत्वस्य वाह्यपुत्राद्यपेक्षया
स्वात्मनोनिरतिशय प्रेमास्पदत्वेनान
न्दरूपत्वस्यात्मन्यनुभूयमानत्वाज्जीवः
कर्ताभोक्ता सुखादुःखीत्यादि धर्माणां
सुषुप्तौव्यभिचारेणयस्यायोधर्मःसतन्नव्य

भिचरति इतिन्यायविरोधेनतेषां जी
वधर्मत्वकल्पनायोगात् दीपप्रकाशवद्गु
ड़माधुर्यवच्च तेषांसर्वदाननुभूयमानत्वा
त् लोहितस्फटिकइतिवदौपाधिकत्व
कल्पनोपपत्तेश्च तथाच जीवेसच्चिदा
नन्दरूपेन्यायकारित्वादयोधर्माःसङ्गच्छे
रन् इतिचेन्न कर्तृत्वादिवन्न्यायकारि
त्वादि धर्माणामपि कल्पितत्वोपपत्त्या
दृष्टविरुद्धसत्यधर्मकल्पनस्योन्मत्त प्रला
पत्वम् दुर्वारमित्यलमति प्रपञ्चेन प्रास
ङ्गिकेन एवंचदृष्टान्तबलेनापिताहृशेश्व
रोनसिध्यतीतिबोध्यं एतेन सर्वसत्यवि
द्यायाः ईश्वरमूलत्वमपि निरस्तमिति
मन्तव्यंस्यादेतत् अशरीरस्य विभोःज
न्यज्ञानायोगात् यद्ज्ञानन्तन्मनोजन्य
मितिव्याप्तिविरोधेन नित्यज्ञानासिद्धे
स्सज्ञानशून्यस्य कर्तृत्वायोगेनेश्वरासि

द्धिः किंच अनुमानस्य-दृष्टानुसारित्वेन विपरीतकल्पनायोगात् यादृशाःकर्ता रोलोकेदृष्टास्तादृशाएव जगत्कर्तारोरा गद्वेषादिमन्तःसिध्येयुर्यदिलोके विचित्रप्रासादादि कर्तुरेकत्वाद्यदर्शनेपि जगत्कर्तुर्लाघवादेकत्वन्नित्यज्ञानन्निर्दोषत्वादिकँचकल्प्यते तर्हि ततोप्यतिलाघवेनमूलप्रकृतेरेवदृष्टविरुद्धं सर्वं कल्पतांकिङ्कृतरदृष्टविपरीतकल्पनयाअसद्रीश्वरधर्मिकल्पनेन किंच विचित्रप्रपंचस्यप्रासादादिवदेककर्तृकताबाधात्नलाघवावतारः नचसर्वज्ञत्वात्कर्तुरेकत्वसम्भव-।एकत्वज्ञानात्सर्वज्ञत्वज्ञानन्त तस्तदित्यन्योन्याश्रयतापत्ते:एतेनविमतमसेश्वरङ्कार्यत्वात् राष्ट्रवत्कर्मफलंसपरिकराभिज्ञदातृकङ्कालांतरभावि फलत्वात्सेवाफलवद्ज्ञानैश्वर्याद्युत्कर्षः क्व

चिद्विश्रांत: सातिशयत्वात्परिमाणवदि त्याद्यनुमानानि निरस्तानि परिमाण स्यक्वचिद्विश्रांतत्त्वमपिन दृष्टङ्कालाका शाद्यनेकेषु विश्रांतिदर्शनाद्दृष्टवदेव सश रीर वानेकत्वादिदोषप्रसङ्गाच्च अत्र के चिद्वैष्णवादय:सशरीरत्वनानात्वरूप वत्त्वादिकमप्यभ्युपगच्छन्ति तदसङ्गत म् अनित्यत्वासर्वज्ञत्वादिदोषस्य दुनि वारत्वात् ।

ननु तच्छरीरस्याप्राकृतत्वात् नत स्यानित्यत्वादिकं सम्भावयितुं शक्यमि तिचेन्नविकल्पासहत्वात् किन्नामा प्रा कृतत्वमप्रकृति विकारभिन्नत्वम्उतप्र कृतिभिन्नत्वम्वानाद्य:विकारभिन्नाया: प्रकृते: शङ्खचक्राद्यायुधविशिष्टहस्तपा दादिविकाररूप शरीरत्वानुपपत्ते: श रीराणांभौतिकत्वनिश्चयात् प्रकृतिवि

कारणशून्यशरीरस्य वन्ध्यापुत्र शरीरवद् प्रसिद्धत्वाच्च नान्त्यः प्रकृतिभिन्नस्य चेतनस्य हस्तपादादिविशिष्टशरीररूपेणापरिणत त्वादनित्यवस्यदुर्निवारत्वे नशून्यवाद प्रसङ्गात्तादृश शरीराप्रसिद्धेश्च किंचरामकृष्णादीनांभिन्नत्वेना। नेकेश्वरकल्पनेप्रमाणाभावात् एकेनै वेश्वरकार्यं सम्भवेऽनेकेश्वरकल्पनावै यर्थ्यापत्तेश्च ।

ननु ईश्वरस्या चिन्त्य शक्तिमत्वान्न कोपिदोषइतिचेन्न तस्यजगत्कर्तृत्वाद्यसिध्या तन्मूलाचिन्त्यशक्तिमत्व स्याप्रसिद्धेः किंच त्वन्मत सिद्धेः परमेश्वरोऽनित्यःपरिच्छिन्नत्वात् रूपादिमत्वाद्विभक्तत्वाज्ज्ञातपद पातित्वेनरागादिमत्वाद्दृश्यत्वेन जडत्वाच्च घट वत् एतेन षठकोपशूद्रशिष्यवर्गान्तः

पातिना बिजय राघवाचारिणा यत्प्र
लपितमीश्वरस्य स्वाभाविकमैश्वर्यम्
निर्विशेषत्वाभावादिकंचेति तन्निरस्तं
सतिकुड्ये चित्रमितिन्यायात् स्यादेत
त् ईश्वरस्यचिद्रूपत्वम्वा जडरूपत्वम्वा
आद्ये बिभो: चिद्रूपस्य कर्तृत्वायोगा
त् जीवे कर्तृत्वाद्यभावस्य दयानन्दम
त परीक्षायां पूर्वपक्ष व्याजेन सूचित
त्वाद्दृष्टांतबलेनापि कर्तृत्वस्य साधितु
मशक्यत्वात् याकृति: साशरीरजन्येति
व्याप्ति बिरोधेन नित्यकृत्याद्यभाव नि
श्चयाच्च तस्य कर्तृत्वासिद्धे; न द्विती
य: जडस्य कर्तृत्वाद्यसम्भवात् ईश्वर
त्वायोगाच्च तथा चैतादृशदोष परिहा
राभावादीश्वरासिद्धि: ।

नन्वीश्वरास्तित्त्वे आगमा: प्रमाण
मितिचेन्न । तेषां निर्मूलत्त्वेनाप्रामा

णिकत्त्वात् न चेश्वरोक्तत्वात्प्रामाण्य
मितिवाच्यम् प्रामाण्यसिद्धावीश्वर सि
द्धिरीश्वर सिद्धौ प्रामाण्यसिद्धिरित्यन्यो
न्याश्रयतापत्तेः; तस्मान्नियतस्यकस्यचि
त्कर्म निमित्तस्याभावान्नाणुष्वाद्यङ्कर्म
स्यात्कर्माभावे न तन्निबन्धनः परमाणु
द्वयसंयोगस्तदभावे द्व्यणुक कार्यानुत्प
त्तिः तस्मादसङ्गतः परमाणु कारणव
दः किंच अणोरण्वन्तरेण संयोगः सर्वा
त्मनावासग्रादेकदेशेन वा नाद्यः सयो
गस्यव्याप्यवृत्तित्वे एकस्मिन्नितरस्य स
र्वात्मना संयुक्तत्वेनान्तर्भावात् कार्य्य
स्यपृथुत्त्वायोगेन सर्वङ्कार्य्यं म्परमाणु
मात्रंस्यात् संयोगस्याव्याप्यवृत्तित्वं दृ
ष्टन्तद्विपरीत मिथ्याकल्पनप्रसङ्गश्चस्या
त् न द्वितीयः परमाणूनां एक देशाव
च्छेदेन संयोगएकदेशावच्छेदेन तदभा

वङ्गति सावयवत्त्व प्रसङ्गात् ।

ननु परमाणूनां कल्पिता: प्रदेशा: सन्तीति चेन्न कल्पितस्य मिथ्यात्त्वेन कल्पित प्रदेश जन्य संयोगस्यापि मिथ्यात्वंस्यात् । नचेष्टापत्ति: संयोगस्य द्वाणुकासमवायि कारणस्य मिथ्यात्वे द्वाणुककार्यानुत्पत्ति: उत्पन्नमपि कार्य्यंम्मिथ्यास्यादित्यपसिद्धांतापत्ते: । तथाच षट्पदार्थ सप्तपदार्थ बन्धमोचादिनियमा: लुप्येरन् सर्वस्य कल्पितत्वात् एतेनात्ममन: सम्योगासम्भवोपिव्याख्यात: निष्प्रदेशत्वात् प्रदेशवतोरेव सम्योगदर्शनात् दृष्टविपरीतकल्पनेमानाभावाच्च किञ्च द्वाणुकन्निरवयवासमवेतं सावयवत्त्वादाकाशाऽसमवेत भूमिवत् ।

ननु द्वाणुकस्याऽसम वेतत्वे त

दाश्रितत्त्वन्नस्यात् सम्बन्धम्बिना तद्
योगात् नच सम्योगाद्दाश्रितत्वमिति
वाच्यं प्रकृतिविकारयो: सम्योगाऽयो
गात तथाच कार्य्यकारणयोराश्रयाश्र
यिभावान्यथानुपपत्या समवाय सिद्धि
स्तत्सिद्धौ तदाश्रितत्वसिद्धिरितिचेन्न ।
कार्य्य कारणयोरभेदात्तदाश्रयाश्रयिभा
वानुपपत्तेरिष्टत्वात् नच तयोर्भेदात्त
त्सिद्धिरिति वाच्यम् भेदसिद्धावाश्रया
श्रयिभावसिद्धिस्तत्सिद्धौ तत्सिद्धिरि
त्यन्योन्याऽऽश्रयतापत्ते; अग्रे वि
स्तरेण तद्भेदस्य निरा करिष्यमाण
त्वात्कारणस्यैवावस्थाभेदमात्रेण व्यव
हारोपपत्तेश्च तथाच परमाणुद्वय संयो
गासिद्धि: किञ्च परमाणव: सावयवा:
अल्पत्वाद्घटवत् नचाप्रयोजकता पर
माणूनां दिग्विभागावधित्वन्न स्यात्

आत्मवदिति बाधक सत्वात् :

ननु परमाणुपेक्षया योयम्प्राची द क्षिणेत्यादि दिग्भेद व्यवहारस्तदवधि त्वेन येवयवास्त्वयोच्यन्ते तएव परमा णवस्तेऽपि सावयवाश्चेत्तदवयवा एव ते ह्रस्व्येव यतः परन्न विभागः सएव नि रवयवः परमाणुरितिचेन्न आत्मभिन्न स्याल्पस्य दिग्विभागार्हत्वेनावयव वि भागावश्यम्भावात् यत्सर्वात्मना विभा गायोग्यम्वस्तु सः परमाणुरिति यद्यु च्येत तर्हि आत्मनएव परमाणु संज्ञा कृतास्यात् तदन्यस्याल्पस्य दिग्विभा गावधित्वेन सावयवत्वस्य दुर्निवारत्वा त् यदि पृथिव्यादि जातीयाल्प परि माण विश्रान्ति भूमिर्य्यः सपरमाणुरि त्युच्येत तर्हि तस्य न मूलकारणत्वम्वि नाशित्वात् घटवत् न च हेतुसिद्धिः

अणवोविनाशिनः पृथिव्यादि जातीय त्वात् घटवदिति साधितत्वात् किञ्च निरवयवानां सम्योग समवाययोरसम्भ वात्तत्समवेत द्व्यणुक कार्याद्यारम्भ क त्वासिद्धिः किञ्च सम्युक्तानाम्परमाणूना म्विभागात्प्रलय इत्यप्यसङ्गतम् युगपद नन्त परमाणूनाम्विभागे नियतस्याभि घातादेः दृष्टस्य निमित्तस्यासत्वाद्धर्म्मा धर्म्मरूपादृष्टस्य सुख दुःखार्थत्वेन सुख दुःखशून्य प्रलय हेतुक विभागाहेतुत्वा त् किञ्च परमाणवः प्रवृत्तिस्वभावावा निवृत्तिस्वभावा वा उभयस्वभावा वा निमित्ताधीन प्रवृत्ति निवृत्ति स्वभावा वा नाद्यः प्रलयाऽभाव प्रसङ्गात् न द्वि तीयःसर्गाभाव प्रसङ्गात् न तृतीयः वि रोधात् न चतुर्थः निमित्तानां काला दृष्टादीनां वक्तव्यानां नित्य सन्निहित

त्वे न नित्यमेव प्रवृत्तिर्न्निवृत्तिर्वा स्या
दित्यप्यसङ्गतः परमाणुकारणवादः किं
च यदपि सावयवानां द्रव्याणामवयव
शो विभज्यमानानां यतःपरो विभागो न
सम्भवति ते चतुर्विधाः यथार्हं स्पर्शा
दिमन्तः परमाणवः चतुर्विधस्य भूत
भौतिकस्यारम्भका नित्याश्चेति कल्पय
न्ति तदप्यसमञ्जसं परमाणवः समवा
यिकारणवन्तः कारणापेक्षया स्थूलाः
अनित्याश्च स्पर्शवत्त्वाद्रूपवत्त्वाद्रस व
त्त्वाद्गन्धवत्वाद्घटादिवत् ।

नन्वत्र परमाणुत्वम्पक्षतावच्छेदक
न्तद्विरुद्धं स्थूलत्वङ्कथं साध्यतइति चेन्न
वायुत्वतेजस्त्वादेःपृथगवच्छेदकत्त्वात्
नच तर्हि वायुः कारणवानिति पृथक्
साधने स्पर्शादिहेतूनां भागासिद्ध्याभा
वेपि सिद्धसाधनता स्यादितिवाच्यम् य

चस्पर्शस्तत्प्रकारणं यच्चरूपत्वत्प्रकारण मिति व्याप्ति ग्रहण काले वायुत्वादव च्छेदेन साध्यसिद्ध्यभावात् नचाप्रयो जकता कारणशून्यस्य नित्यत्वसत्यात्म वत्स्पर्शादि मत्वायोगात् यदुक्तम्पर माणवोनित्याः भावत्वेसत्यकारणवत्त्वा दात्मवदिति तन्नोपपद्यते विशेष्यासि द्वेस्साधितत्वात् प्रागभाववारणाय स त्यन्तम्बोध्यं यदप्युक्तन्नित्यत्वप्रतिषेधः सप्रतियोगिकः अभावत्त्वात् इति नि त्यत्वस्य क्वचित्सिद्धौ कार्य्यमनित्यमि तिविशेषत कार्येनित्यत्वप्रतिषेधात्कार णभूतपरमाणुषु नित्यत्त्वंसिध्यति अन्य था प्रतियोग्यभावे प्रतिषेधानुपपत्ति रिति तदप्यसङ्गतम् नित्यत्वप्रतिषेधप्र तियोगिनो नित्यत्त्वस्यात्मनि सिद्धत्वे न अन्यथासिद्धेः नह्यनित्यत्वप्रतियोगि

नोनित्यत्वस्य परमाणुष्वेव पर्यवसानं नान्यत्रेति किंचिन्नियामकमस्ति नहि कारणनित्यत्वस्य प्रमाणान्तरेण ज्ञानम्बिना कार्य्यमनित्यमिति व्यवहारः सम्भवति नहि प्रमाणान्तरेण मूलज्ञानात्माक् शब्दार्थ व्यवहार मात्रेण कस्यचिदर्थस्य सिद्धिर्भवति अन्यथा वटयक्षवन्ध्यापुत्रादि शब्दार्थ व्यवहारेणापि तेषां सिद्धिः स्यात् ।

ननु परमाणवोनित्याअप्रत्यक्षत्वे सति कारणत्वादात्मवदितिचेन्न द्व्यणुके व्यभिचारात् नचारम्भकद्रव्यशून्यत्वं हेतुविशेषणमिति बाच्यम् बिशेष्य वैय्यर्थ्यापत्तेःविशेषणासिद्धेःप्रदर्शितत्वाच्च।

ननु परमाणवोनित्याः नाशकाभावात् आत्मवदिति चेन्न प्रलय कारणभूत कालादृष्टादीनां नाशकत्वोपपत्ते

नासीद्रजोनो व्योमेतिश्रुतेश्च सिद्धान्ते परमाणूनामविद्यापरिणामरूपत्वात्प्रिगड स्वरूप तिरोभावेनाविद्यारूप कारणरूपापत्तिरेव तेषां नाशङ्गल्यभ्युपगमाच्च स्यादेतत् यद्यस्मादधिक गुणवत्तत्स्मात् स्थूलमिति व्याप्तिसिद्धं पृथिव्यप्तेजो वायुषु गुणोपचयापचय वत्त्वं स्थूल सूक्ष्म सूक्ष्मतर सूक्ष्मतमत्वं च दृष्टं तद्वत्तेषां परमाणूनामप्युपचितापचित गुणवत्त्वङ्कल्पते वा न वा आद्ये परमाणुत्वाभावप्रसँगात्तथाहि पार्थिवः परमाणुराप्यात् स्थूलः अधिक गुणवत्वाद्घटवत् नचाप्रयोजकत्वन्दृष्टविरुद्ध कल्पनस्य बाधकत्वात द्वितीयेतु सर्वेषां परमाणूनांसाम्यार्थमेकैक गुणत्वं वा स्यात् चतुर्गुणवत्वं वा आद्ये तेजप्रभृतिषु गुणान्तरानुपलम्भ प्र:

सङ्ग: स्यात् द्वितीये वाय्वादिष्वपि ग न्धाद्युपलब्धि प्रसङ्गःस्यात् तस्मादसङ्ग तैषाप्रक्रियास्यादेतत् यदुक्तं कारणगु णा: कार्यैस्वसमान जातीय गुणारम्भ काइति तन्न परमाणु परिमाणे व्यभि चारात् ।

ननु पारिमाण्डल्य भिन्नानां कार णत्वमित्यभ्युपगमान्न दोष इतिचेन्न। द्यणुकगताणुत्वह्रस्वत्वे व्यभिचारात्।

ननु विरोधि परिमाणान्तराक्रान्त त्वादणुत्वह्रस्वत्वयोर्नारंभकत्वमितिचेन्न उत्पन्नं हि परिमाणान्तरम्विरोधि भव ति उत्पत्ते: प्राग्विरोधाभावेनारम्भकत्व सम्भवात् ।

ननु विरोधिपरिमाणेन सहकार्य्य मुत्पद्यतइतिचेन्न उत्पन्नंद्रव्यं क्षणमगु णन्तिष्ठतीत्यभ्युपगमादपसिद्धान्तापत्ते

यत्तु कारणानां द्व्यणुकानां बहुत्वात्त्र्य णुके महत्वं मृदोमहत्त्वाद्घटे महत्वंद्वि तूलपिण्डारब्धेति स्थूलपिण्डे अवय वसंयोगविशेषान्महत्त्वं द्व्यणुके परमा णुगतद्वित्वसङ्ख्यायाणुत्वं अणुत्त्वमहत्त्वयो र्ह्रस्वसमवायिकारणन्तदेव ह्रस्वत्व दी र्घत्त्वयोरप्यसमवायि कारणमित्युक्तन्त दपि न शोभते स्वसमानजातीय गुणा न्तरारम्भकत्व नियम भङ्गस्यानिर्मोच्य त्वात्कारणगत परमाणु बहुत्त्वात्तत्सं योगविशेषाच्च महत्वदीर्घत्त्वोत्पत्ति प्र सङ्गाच्च यत्पुनरुक्तङ्कारण गुणाः स्वसमा नजातीय गुणारम्भकाइति व्याप्तिः सा मान्यगुणेषु व्यभिचारेपि योद्रव्य सम वायिकारणगतोविशेष गुणः सः स्वस मानजातीय गुणारम्भक इति व्याप्तेर व्यभिचारित्वमिति तन्मन्दम् चित्रपट

हेतु तन्तुगतेषु नीलादिरूपेषु विजाती
य चित्ररूपहेतुषु व्यभिचारात् यत्तु म
हदारब्धस्य महत्तरत्वमिति तदपेश
लस्महद्दीर्घविस्तृत पटारब्ध रज्जौ व्य
भिचारात यत्पुनरुक्तमुत्पत्तेः पूर्वमस
तः कार्य्यस्य घट पटादेर्दण्ड चक्रादि
व्यापारवशादुत्पत्तिरिति तदसङ्गतम्
दधिघट रुचकाद्यर्थिभिः प्रति नियता
नि कारणानि चीरमृत्तिका सुवर्णादी
न्युपादीयमानानिलोकेदृश्यन्तेनतद्विप
रीतानि कार्य्यस्यासत्वेऽसतस्सर्वत्वावि
शेषात्सर्वस्मात्सर्वोत्पत्तिप्रसङ्गेन दध्या
द्यर्थिनां चीराद्युपादाने प्रवृत्तिर्न स्या
त् ।

ननु कार्य्यस्यासत्त्वेपि कुतश्चिदति
शयात्प्रवृत्ति नियमोपपत्तिरितिचेन्न ।
विकल्पासहत्त्वात्तथाहि अतिशयः का

र्य्यधर्म्म: कारणधर्म्मोवा आद्ये धर्मि
त्वात्प्रागवस्था रूपस्य कार्य्यस्य सत्वन्तु
र्वारंस्यात् द्वितीये कारणस्य कार्य्यनि
यमार्थी कल्प्यमाना शक्ति: कारणाद्भि
न्नावाऽभिन्ना वा भिन्नाचेदसती वा स
ती वा नाद्य: भिन्नायाश्चसत्याश्च शक्ते:
शशविषाणवत्कार्य्यं नियामकत्वायोगा
दन्यथा शशविषाणस्यापि तदापत्ते:
न द्वितीय: भिन्नाया: सत्याश्च शक्तेर्म
हिषवत्कार्य्ये नियामकत्वायोगात्कार
णधर्म्मत्त्वायोगाच्च अन्यथा भिन्नत्वावि
शेषेण महिषस्यापि तदापत्ते: अभिन्ना
चेदसती वा सती वा नाद्य: अभिन्ना
याअसत्याश्चशक्ते: नरशृङ्गवत्कार्य्ये नि
यामकत्वाभावस्योक्तत्वात् अत्र सर्वत्र
नियामकत्वञ्च अस्मिन्नेवेदङ्कार्यमुत्पद्य
ते नान्यस्मिन्नित्येवंरूपंबोध्यम् न द्विती

यः अभिन्नायाः सत्याश्च शक्तेः कारण रूपत्वेन कारणवदेव कस्यचिद्विशेष स्याभावेन कार्यनियामकत्वायोगादप सिद्धान्तापत्तेश्च किञ्च पटश्चलतीत्यत्र चलनक्रियाश्रयः पटोदृष्टः तद्वत्पट उ त्पद्यत इत्यत्रापि पटस्योत्पत्ति क्रियाश्रयत्वं वाच्यम् तथा च क्रियाश्रयस्य पूर्वं वृत्तित्वनियमात् सत्कार्यवादप्रस ङ्गःस्यात् अन्यथा पटस्योत्पत्तेः प्राग सत्वे उत्पत्ति क्रियायाः निर्विषयत्वं स्यात् पटउत्पद्यतइति व्यवहारोपि न स्यात् स्यादेतत् कानामोत्पत्तिः कार्यस्यस्वकारणेसमवायोवास्वस्मिन्स त्तासमवायोवानाद्यः असद्रूपात्मकस्य कार्यस्यकारणेन संबन्धायोगात्सतोर्हि द्वयोःसम्बन्धःप्रसिद्धःनासतोस्सदसतोर्वा निरात्मकस्यासतः संवन्धित्त्वायोगात्

अन्यथावन्ध्यापुत्रस्यापि सम्बन्धित्वप्रस ङ्गः एतेन द्वितीयोपि निरस्तः अलब्धा त्मकत्वस्य तुल्यत्वात् ।

ननु वन्ध्यापुत्रवत्कार्यं सर्वदा सर्वं त्रासन्नभवति किन्तु उत्पत्तेः प्राक् ध्वं सानन्तरञ्चासन्मध्ये तु सदेवेतिवैषम्या त्सं बन्धित्वोपपत्तिरितिचेन्न प्रागूर्ध्वं ञ्च असत्वाविशेषात्सं बन्धित्वानुपपत्तिरेव स्यान्मध्ये तु सत्वात्सं बन्धाभावानुक्तेश्च असद्रूपस्याभावस्य कालेनासम्बन्धात्प्रा गासोदूर्ध्वम्भविष्यतोत्युक्तमयुक्तं स्यात् नहि वन्ध्यापुत्रोराजावभूव प्राक्पूर्णं व र्म्मणोभिषिकादित्यं वञ्जातीय केन प्रा कृतमर्य्यादाकरणेन निस्वरूपोवन्ध्या पु त्रोराजात्वभूव भवति भविष्यतिवा इ तिविशिष्यते ।

ननु कारक व्यापारादूर्ध्वम्भाविःन

कार्यस्य कथं वंध्यापुत्रतुल्यत्वमिति चेन्न असत: कारकव्यापारादूर्ध्वं सम्भाव्यत्वेवंध्यापुत्रोपि कारक व्यापारादूर्ध्वं सम्भविष्यति तथा चवन्ध्यापुत्रस्य कार्य्याऽभावस्य चाभावत्वाऽविशेषाद्यथा वन्ध्यापुत्र; कारकव्यापारादूर्ध्वं न भविष्यति तथाऽसत्कार्य्यमपि कारक व्यापारादूर्द्ध्वं न भविष्यति तस्मात्कारकव्यापारादूर्द्ध्वमुत्पद्यमानङ्कार्य्यम्प्रागपि सदित्त्येवावसेयम्यदुक्तमनादिस्सान्त: प्रागभावइति तत्तुच्छम् प्रागभावाधिकरणस्य मृत्पिण्डादे:सादित्वेन तस्यानादित्वाऽसंभवात् यदप्युक्तम् सादिरनन्त: प्रध्वंसाभाव इति तदप्यसमञ्जसम् पूर्वेद्युर्दृष्ट घटकपालिकादिकमद्य दृष्ट्वा घटो नश्यतीति व्यवहारापत्ते; तस्य नित्यत्वेनवर्त्तमान

त्वात् यद्यप्युक्तकारणत्रयं बिना कार्यं नोत्पद्यतइति तन्न परमाणुषु जाय मानाऽऽद्यक्रियायामसमवायि कारणा भावेन व्यभिचारात् ।

नन्वस्त्वेतत् कारकव्यापारानर्थक्य म्प्रसज्जेत प्राक् सिद्धत्वात्कार्य्यस्येति चेन्न कारकस्य कार्य्याकारेणव्यवस्था पनार्थत्वात् प्रत्युताऽसत; कार्य्यस्य कारक व्यापाराविषयत्वात् कारक व्यापाराहितातिशयाश्रयत्वायोगेन त वैव कारक व्यापार वैय्यर्थ्यंस्यात् ।

ननु समवायि कारणविषय: कार कव्यापारइतिचेन्न समवायिकारणात् कार्य्यस्य भिन्नत्वे अन्यविषयेण कार कव्यापारेण अन्यनिष्पत्तावति प्रसङ्ग: स्यात् अभिन्नत्वेपसिद्धान्तापत्ति: स्या त् ।

ननु कारणस्य कार्य्याकारेण व्यव स्थितिः सतीवासतीवा आद्ये कारक व्यापार वैय्यर्थ्यं द्वितीये असत्कार्य्यवा द प्रसङ्गइतिचेन्न कार्य्यस्यानिर्वाच्यत्त्वे न दोषाभावात् वस्तुतस्तु असत्कार्य्य-वादवत् सत्कार्य्यवादेपिदोषाः प्रादुर्भ वन्ति तस्मात्कार्य्यस्य सत्वाऽसत्वाभ्यां अनिर्वचनीयत्त्वाद्वच्यमाणरीत्या कार्यं स्यकारणाद्भिन्नत्वाऽभिन्नत्वाभ्यां चानि र्वचनीयत्वात् सर्वङ्कार्यं अनिर्वचनीय मितिबोध्यम् यदुक्तमुत्पन्नङ्कार्यं कारणा द्भिन्नमिति तदसमञ्जसं मृद्घट इत्त्यभे दानुभवात् मृद्घटौभिन्नाविति भेद बु ध्यनुदयाच्च।

ननु तयोरन्यत्वेपि समवायवशात्त याबुद्धिर्नोदितीति चेन्न कार्य्यकारणा भ्यामत्यन्तभिन्नस्य समवायस्य तन्निया

मकत्त्वायोगात् समवायस्य वन्ध्या पुत्र तुल्यत्वाच्च तथाहि समवायस्समवायि भि: सम्बन्धोनवा आद्ये संवन्ध:किं स मवायउतस्वरूप: नाद्य: अनवस्था प्रस ङ्गात् नद्वितीय: मृद्घटयोरपि स्वरूपसं बन्धेनैव व्यवहारोपपत्ते: समवायाऽसि द्धि: आद्यद्वितीये समवायस्य समवा यिषु वृत्तौ संवन्धान्तरापेक्षाभावेसम्यो गस्यापि स्ववृत्तौ संवन्धान्तरापेक्षा न स्यात् ।

ननु सम्योगस्य गुणत्वात्संबन्धान्त रापेक्षा समवायस्य तदभावान्नेतीति चेन्न समवाय: समवायिषु संवन्धविशि ष्टोभवितुमर्हति धर्म्मत्त्वाद्गोत्त्ववदित्य नुमान प्राप्तापेक्षा कारणस्य तुल्यत्वा त् नह्यसंवद्धस्याश्वत्त्वस्य गोधर्म्मत्त्वन्दृ ष्टम् गुणपरिभाषायाश्च गुणत्त्वाभावेपि

कर्म्मसामान्यादीनां संबन्धापेक्षा दर्श नेनाप्रयोजकत्वात् किञ्च निष्क्रापत्वा दयोगुणाइति श्रुतिस्मृत्यादिषु व्यवहा रादिष्टधर्मोगुण इतिपरिभाषया सम वायस्यापि गुणत्त्वाच्च जातिविशेषोगु णत्वमिति परिभाषातु समवायसिद्ध्युत्तरकालीन नित्यानेकसमवेता जाति रिति ज्ञानस्य समवाय ज्ञानाधीनत्वे न समवायसिद्धेः प्राक्सम्योगस्य गुण त्त्वमसिद्धमिति दिक् यदुक्तमयुतसिद्ध योः समवायइति अत्र भवान् प्रष्टव्यः किमुभयोरयुतसिद्धत्वमुताऽन्यतरस्य नाद्यः प्राक् सिद्धस्य कार्यात्कारणस्या युतसिद्धत्वानुपपत्तेः द्वितीये किमसि द्धस्य समवायसम्बन्धः उतसिद्धस्य ना द्यः प्रागसिद्धस्य अलब्धात्मकस्य कार्य स्य कारणेन सम्बन्धायोगेनायुत सिद्धे

त्वायोगात् संबन्धस्य द्विनिष्ठत्वात् न द्वितीय: प्राक्कारणासम्बन्धात्कार्य्यस्य सिद्धावभ्युपगम्यमानायामयुतसिद्धत्वं नस्यात् सतोरप्राप्तयो: प्राप्तिसम्योगइत्यभ्युपगमेन तन्तुपटयोरपि सम्योगापत्तिश्चस्यात् किञ्च किन्नामायुत सिद्धत्वन्देशत: अपृथक् सिद्धत्वं उत का लत: अथवा स्वभावत: नाद्य: शुक्ल: पट इत्यत्र तन्तुदेशे पट: पटदेशे शुक्लगुणइतिव्यभिचारात् न द्वितीय: सव्यदक्षिणयोरपि गोविषाणयोरयुतसिद्धत्व प्रसङ्गात् न तृतीय: स्वभावस्य स्वरूपानतिरेकेणास्मदिष्टाभेदसिद्धे: किञ्च सम्योगस्य समवायस्य वा सम्बन्धस्य सम्बन्धिभिन्नत्वे नास्तित्वे प्रमाणाभावात् ।

ननु सम्बन्ध: सम्बन्धिभिन्नस्तद्विलक्षण

णाशब्दधीगम्यत्वात् वस्त्वन्तरवदित्यनु
मानन्तच्च प्रमाणमितिचेन्न एकस्यापि
स्वरूपबाह्यरूपापेक्षया मनुष्योब्राह्मणो
श्रोत्रियोबदान्य इत्याद्यनेक विलक्षण
शब्दधीगम्यत्वेन व्यभिचारात् सम्बन्धि
नोरेव सम्बन्धिशब्द प्रत्ययव्यतिरेकेण
मनुष्योब्राह्मण: श्रोत्रिय इत्यादिवत्स
स्योगसमवायादि शब्दप्रत्ययार्हत्व सम्भ
वाच्च विलक्षण शब्दधीगम्यत्वादित्युप
लब्धिघटितेन लिङ्गेन प्राप्तस्य वस्त्व
न्तरस्य संयोगादे: सम्बंधिव्यतिरेकेणा
नुपलब्ध्या तदभावनिश्चयाच्च एतेन गु
णादीनां द्रव्याभिन्नत्वं व्याख्यातं गुणा
दयोद्रव्याभिन्नास्तदधीनत्वात्, यन्नैव
न्तन्नैवम् यथाशशभिन्न: कुश इत्यनुमा
नेन तद्भेदस्य बाधितत्वाच्च अन्यथा गु
णादीनां तद्धर्मत्वमपि न स्यात् तथा

हि गुणादयोनद्रव्यधर्म्मा:स्यु: भिन्नत्वा
त् महिषाश्ववदित्यनुमानबाधात् ।
किञ्च अन्योन्याभावरूप भेदासिद्धेश्चत
दभेदसिद्धि: तथाहि घट:पटोनभवति
इति वद्वटो घट भेदो न भवति
इतिप्रतीतिसिद्धस्य घटभेदभेदस्य कि
ङ्घटरूपत्वमुतभेदरूपत्वम् अथवा तदुभ
यभिन्नत्वं नाद्य: अभावरूपस्य भेदस्य
भावरूपत्वायोगात् प्रतियोग्यतिरिक्ता
भावासिद्धिप्रसङ्गेनापसिद्धान्तापत्तेश्च
न द्वितीय: आत्माश्रयात् न तृतीय:
अनवस्थापत्ते; स्यादेतत् कारणेषु अ
वयवद्रव्येषु वर्त्तमानङ्कार्य्यमवयविद्रव्य
ङ्किं समस्तेषु अवयवेषु वर्तते उतप्रत्य
वयवम् आद्ये अवयविन: पटादेस्तन्तु
आदिषु अवयवेषु चित्वादिवत् स्वरू
पेण वृत्तिरुतहस्तिकोशे च वर्त्तमानासि

वदवयवशोवा नाद्यः व्यासज्य वृत्तिव
स्तु प्रत्यक्षस्य यावदाश्रय प्रत्यक्ष जन्य
त्वात्संवृतपटादेर्यावदवयवानां अप्रत्यक्ष
त्वादप्रत्यक्षत्वं स्यात् न द्वितीयः अनव
स्थाप्रसङ्गात् तथाहि आरम्भकावयव
व्यतिरेकेण यैरवयवैरारम्भके ष्ववयवेषु
अवयवशोऽवयवी वर्तेत तेऽवयवाः क
ल्पेरन् यथा कोशावयव व्यतिरिक्तैरव
यवैरसिः कोशंव्याप्नोति तद्वत् तथाच
तेषु तेषु अवयवेषु वर्तयितुमन्येषाम
न्येषामवयवानां कल्पनीयत्वादनवस्था
प्रसङ्गः प्रत्यवयवं वर्तेतइतिपक्षेएकस्मि
न्स्तन्तौ पटवृत्तिकाले तन्तु अन्तरे प
टस्य वृत्तिर्नस्यात् वृत्तावप्यनेकत्वाप
त्तेरेकत्व व्यापारैन्यच व्यापारानुपपत्ते
श्च ।

ननु यथायुगपदनेक व्यक्तिषु वृत्ता

वपि जातेरनेकत्वदोषो नास्ति तथाऽवय
विनोऽपि युगपदनेकावयवेषु वृत्तौ दो
षोनास्तीति चेन्न गोत्वजातिवदवयविनो
युगपदनेकावयववृत्तित्वानुभवाभावात्
अन्यथा यथा गोत्वम्प्रति व्यक्तिप्रत्यक्ष
ङ्गृह्यते तथावयव्यपि प्रत्यवयवम्प्रत्यक्ष
ङ्गृह्येत यदुक्तङ्कटोमृद्भिन्नस्तद्विरुद्धपृथु
बुध्नादिविशेषाकारवत्वाद्वृक्षवदिति तन्न
एकस्यैवदेवदत्तस्य सङ्कुचित हस्तपा
दादिमत्वेन प्रसारित हस्तपादादिम
त्वेन च विशेषितत्वेऽपि वस्त्वन्यत्वादर्श
नेन व्यभिचारात् किञ्च प्रत्यहमेधमा
नानां पित्रादिदेहानामवस्थाभेदेऽपि ज
न्ममरणयोरदर्शनेन वस्त्वन्यत्वासम्भवा
द्व्यभिचारः अन्यथा पित्रादयोमृता अ
न्येपित्रादयउत्पन्नाश्चेति प्रत्यहं व्यवहा
रः भवति न चेष्टापत्तिस्त्वा यस्मम पि

तात्सेयम्मम भ्राता सेयम्मम मातेति प्रत्यभिज्ञानात् अन्यथा पित्रादि व्यवहारलोप प्रसङ्ग:स्यात् दृष्टान्तासिद्धेश्च तस्मात्कारणाद्भिन्नङ्कार्य्यमित्येतदसिद्धं स्यादेतत् यदुक्तमाकाशोनोत्पद्यते सामग्रीशून्यत्त्वादात्मवत् नचाविद्यात्मनो: सत्वाद्धेत्वसिद्धिरिति वाच्यम् विजातीयत्वेन तयोरारम्भकत्वायोगादसम्यु क्तत्वात्संयोगस्य द्रव्यासमवायिकारणस्य चाभावात् तथाच समवाय्यसमवायिनोरभावेन हेत्वसिद्ध्यभावादाकाशस्याजत्वसिद्धिरिति तदपेशलम् आकाशोविकार: विभक्तत्त्वात् घटवत् योविभक्त: सविकार: यथाघट: यस्त्वविकार:स न विभक्त: यथात्मादृग्ध्यनुमानेनाकाशोत्पत्तिसम्भवात् दिगादीनां पक्ष समत्त्वेन व्यभिचाराभावाच्च।

नन्वात्मनि विकारित्वाभाववति विभक्तत्वहेतोस्सत्त्वाद्व्यभिचार इति चेन्न धर्मि समान सत्ताक विभागस्य हेतुत्वात् परमार्थात्मनि विभागस्य कल्पितत्वेन भिन्नसत्ताकत्त्वात् निर्गुणात्मनि विभागाश्रयत्त्वासम्भवेन व्यभिचार शङ्काया अप्यभावात् नचाप्रयोजकता द्व्यणुकादीनामपिनित्यत्त्वापत्तेः।

ननु आत्मा कार्य्यः विभक्तत्त्वात् वस्तुत्वाद्वा घटवदितिचेन्न निर्धर्मिके आत्मनि वस्तुत्वाद्यभावेन हेत्वसिद्धेः।

ननु दुःखित्वादि धर्म्माणामात्मनि प्रतीयमानत्वात्कथमात्मनोनिर्धर्मिकत्वमितिचेन्न नाहं विभुः किन्तु परिच्छिन्नोहं स्थूलोहं कृशोहमित्यादिवत्तेषामौपाधिक धर्म्मत्वोपपत्तेः; अन्यथा विभुत्वादिकमपि न स्यात् किञ्च आ

त्मनोये दुःखित्त्वादिकमभ्युप गच्छन्ति तेच प्रष्टव्याः किमात्मनो दुःखित्त्वादिकं दीपस्य प्रकाशवत् गुड़स्य माधुर्य्यवत् स्वाभाविकमुत स्फटिके लौहित्यवदौपाधिकम्वा नाद्यः दुःखित्वादीनां नाशाय तत्वविचारादौ प्रवृत्तिर्न्नस्यात् स्वाभाविकत्वात् नहि बुद्धिमता स्वभावनाशाय यत्नः क्रियते कृतोवा नाशो भवति स्वस्यैव नाशापत्तेः प्रकाशादिवत एतेन येचक्राङ्किताः निर्विशेष व स्वभाववादिनस्ते स्वात्महनन कर्तार इति सिद्धम् किञ्च सुषुप्तौ तेषामदर्शनेन स्वाभाविकत्वासम्भवात् नहि दीपस्य प्रकाशः कदाचिद्दीपाश्रयः कदाचिन्नेतीति वक्तुं शक्यं दृष्टविरोधात् न द्वितीयः अस्मदभिमत पारमार्थिक निर्धर्म्मिकत्वोपपत्तेः तथाच हेत्वसिद्धिः

किञ्च सर्वसाक्षिण आत्मन: कार्य्यत्वे शून्यवाद प्रसङ्ग: स्यात् न चेष्टापत्ति: शून्यस्यासाक्षिकत्वे शून्यस्याप्यसिद्धि: स्यात् किञ्च आत्मन; कार्य्यत्वमसिद्धन्तत्साक्षिणोऽभावात् तत्प्रागभावानुभवितुरभावाच्च यन्नैवन्तन्नैवम् यथाघट: इत्यनुमानवाधात् न च हेत्वसिद्धि: अनवस्थादि दोष प्रसङ्गात् ईश्वराभावस्योक्तत्वाच्च किञ्च सर्वत्र कार्य्यस्य सत्तास्फुर्तिमत्त्वमन्यापेक्षं दृष्टं तदभावेनाप्यात्मन: कार्य्यत्वासिद्धि: अहमस्मि वा न वेति संशयाद्यभावात् किञ्च प्रमाता च प्रमाणं च प्रमेयं प्रमितिस्तथा यस्य प्रसादात्सिध्यन्ति तत्सिद्धौ किमपेक्षत इत्युक्तत्वादप्यात्मनोऽजत्त्व सिद्धि: एतेन आत्मन: कार्य्यत्वे प्रमाणाद्यभाव: स्पष्टीकृत: आ

त्मन: स्वतस्सिद्धत्वाद्सिद्ध प्रमेयाणां आकाशादीनां प्रमेयत्व सिद्धये प्रमाणापेक्षत्वान्न तद्वैय्यर्थ्यमित्यपि बोध्यम् तथाच नित्यस्यात्मनोऽविद्या सहितस्योपादानस्याऽदृष्टादि निमित्तस्य च सत्वादाकाशानुत्पत्ति हेतोस्सामग्री शून्यत्वस्य स्वरूपासिद्धेरुक्त स प्रतिपक्षबाधाश्चाकाशस्य कार्य्यत्वन्निरवद्यं चविद्या चात्र जड़ प्रपंच कार्यान्यथानुपपत्त्या सिद्ध सत्वरजस्तमोगुणात्मिका मूलप्रकृतिरिति बोध्या यत्तूक्तमात्माविषयोर्विजातीयत्वान्नाकाशारम्भकत्वमिति स च भवान् प्रष्टव्य: किङ्कारणमात्रस्य साजात्य नियम: उत समवायिकारणस्य नाद्य: घटाद्यसमवायि कारणे संयोगादौ द्रव्यगुणयोर्विजातीयत्वे न व्यभिचारात् द्वितीये समवायि तावच्छे

टक धर्मेण साजात्यमुत सत्तादिना
नाद्यः सूत्र गोबालारब्धैकरज्जौ व्यभि
चारात् सूत्रैरुर्णनाभिभिश्चारब्ध कम्ब
लयस्ते व्यभिचाराच्च न च सूत्र गोबा
लयोर्न द्रव्यान्तरत्वमिति वाच्यम् पटा
देरपि तथात्वापत्ते: न द्वितीय: सर्वस्य
सर्वेण साजात्यान्नियमानर्थक्यं स्यात्
आत्माविद्ययोर्वस्तुत्वेन साजात्यादस्म
दिष्टसिद्धेश्च एतेनाविद्यात्मनो: सम्यो
गोसमवायि कारणमपि व्याख्यातम्
यदुक्तमनेकं समवायि कारणङ्कार्य्यमा
रभत इति तन्न यर्णोर्मनसश्च क्रिया
समवायि कारणस्यैकत्वेन तदारब्धा
द्य क्रियायां व्यभिचारात् यदुक्तं य
त्कार्य्यद्रव्यन्तत्सम्योग सचिव स्व न्यून
परिमाणानेक द्रव्यारब्धमिति तन्न दी
र्घं विस्तृत दुकूलारब्धरज्जौ व्यभिचारा

त, न च रज्जुनं द्रव्यान्तरमितिवाच्यं अवयवविभागे विनशापत्तेः यत्कार्य्यं द्रव्यन्तद्द्रव्यारभ्यमिति व्याप्त्यपेक्षयागौरवाच्च अथवोक्तरीत्या परमाणूनां जगदुपादानत्वासम्भवेन जड़ प्रपंच कार्यान्यथानुपपत्त्या अश्रमः इत्यनुभवेन च सिद्धायाः सत्वरजस्तमोगुणात्मिकायाः मायान्तु प्रकृतिम्विद्यादित्यादि श्रुति बोधितायाः अविद्या ज्ञान शक्त्यादिने क पदवाच्यायाः मूल प्रकृतेरुपादान कारणभूतायाः आत्मा दृष्टादि निमित्तस्य च सत्वादाकाशोऽनुत्पत्तिहेतोरसाम श्री शून्यत्वस्य स्वरूपासिद्धे रसत्प्रतिप क्ष बाधाच्चाकाशस्य कार्य्यत्वन्निरवद्य म्, यत्तूक्तमुत्पत्तिमतां तेजः प्रभृतीनां पूर्वोत्तरकालयोरप्रकाश प्रकाशौ विशेषौ दृष्टावाकाशस्य पुनः पूर्वोत्तर का

लयोर्विशेषाभावात्प्रागभाव शून्यत्वम् तथाच चाकाशोनोत्पद्यते प्रागभावशून्यत्वादात्मवदिति तन्न शब्दानाश्रयत्वाश्रयत्वयोर्विशेषवत्त्वेन प्रागभाव शून्यत्वहेतोरसिद्धत्वात् नहि प्रलये शब्दाश्रयत्वं सम्भवति येन विशेषेण पृथिव्यादि भिन्नत्वं सिध्येत किंच नासीद्रजोनो व्योमापरोयदित्यादि श्रुत्यापि प्रलये पृथिव्यादि भिन्नाकाशाभावसिद्धि; ।

ननु चाकाशाभावे काठिन्यं स्यादिति चेत्सुशिच्चितोयं नैयायिक तनय; नह्याकाशाभावस्तद्धर्म्मो वा काठिन्यं किन्तु मूर्तद्रव्यविशेषस्तद्धर्म्मो वा काठिन्यम् तस्य प्रलयेऽभावादिति यदप्युक्तमाकाशोनोत्पद्यते विभुत्वादात्मवदिति तदसङ्गतम् सर्वमूर्तद्रव्य सम्यो

गस्य विभुत्वस्य निर्गुणात्मन्यसम्भवेन दृष्टान्तासिद्धिः सम्योगस्य सावयवत्व नियतस्याजत्व साध्य विरुद्धतापत्तेश्च स्वरूपोपचय मप्यत्वन्तु त्वयानभ्युपग मादभ्युपगमे वा निर्गुणात्मन्यसत्वेन दृष्टान्तासिद्धिः नाहम्विभुरिति प्रत्यक्ष विरोधेनदृष्टान्तासिद्धेश्च ज्यायानाका शादित्यागमबाधाश्च ।

ननु कश्चिदाकाशसाम्यमपिश्रुतमि तिचेन्न तस्य इषुरिव सविता धावती ति वदात्मनोनिरतिशय महत्त्व प्रति पादनायोपपत्तेः नच पूर्वोत्तरविरोधः यौक्तिकवैदिक मतयोर्वैधर्म्यात् यत्पुन रुक्तम् स्पर्शिद्रव्यत्वात् निरवयवत्त्वा च्चाकाशो नोत्पद्यते चात्मवदिति त दप्ययुक्तम् पंचीकरणादस्पर्शित्वाऽसि द्धेः द्रव्यत्वजातेर्निर्गुणात्मन्यभावेन

दृष्टान्तासिद्धेश्च कार्य्यद्रव्यत्वान्निरवय
वत्वासिद्धे: आकाशोऽनित्य: स्व समा
नसत्ताक गुणवत्वात् अनित्य गुणाश्र
यत्वाद्वा घटवत् निर्गुणात्मनि गुणा
श्रयत्वाभावेन नव्यभिचार:कल्पितगुण
वत्वेपि स्व समान सत्ताक गुणाश्रय
त्वाभावान्न व्यभिचार: नचाप्रयोजक
ता यदि धर्मिविनाशेनस्यात्तर्हि [गुण
नाशोपि न स्यात् इत्यनुकूल तर्कस्य
विद्यमानत्वादितिदिक् यदुक्तमात्मा
द्विविध: जीवात्मा परमात्मा चेतित
दयुक्तम् आत्माएक: विभुत्वात् आका
शवदित्यनुमानबाधात् न चाप्रयोजक
ता आकाशादीनामपि नानात्वापत्ते:
एतेन विभुजीवात्मनानात्वमपि निर
स्तम् किञ्च आत्मनोनानात्वे विभुत्वे
चाभ्युपगम्यमाने सुखदु:ख साङ्कर्य्यप्र

सङ्ग: आत्मन: सर्वगतत्वेन सर्वात्मस न्निधावुत्पद्यमानं सुखदु:खफलमस्यैव नान्यस्येत्यत्र नियामकाभावात् ।

ननु तत्तदात्ममन: सम्योगस्य नियामकत्वमिति चेन्न सर्वात्म सन्निधौ वर्तमानस्मन: यदैकेनात्मना संयुज्यते तदा नात्मान्तरैरित्यत्रनियामकाभावेन तत्तदात्म मनस्सम्योगस्य नियामकत्वायोगात् ।

ननु यदात्मा दृष्टकृतोयोमन: सम्योग: स तदात्मन एव नान्येषामि त्यदृष्टस्य नियामकत्वमितिचेन्न सर्वात्मसन्निधावुत्पद्यमानस्यधर्म्माऽधर्म्मलक्षणमदृष्टमस्यैव नान्येषामित्यत्रापिनियामकत्वाभावेनादृष्टस्य नियामकत्वायोगात् ।

ननुरागादीनामदृष्टनियामकत्वमि

तिचेन्न तेषामप्यात्ममनः संयोगजत्वे नोक्तदोष तुल्यत्वात् ।

ननु तत्तच्छरीरावच्छिन्नात्म मनः संयोगस्य रागादि नियामकत्व मितिचेन्न सर्वात्म सन्निधावुत्पद्यमान शरीरस्यै व नाद्ये षामित्यत्र नियामकाभावेन तत्तच्छरीरावच्छिन्नात्ममनः सँयोगस्य पि रागादि नियामकत्वायोगात् तस्मादात्मनानात्व बिभुत्व वादिनां सुखदुःख साङ्कर्यं दुर्वारमिति सिद्धम् एतेनाद्यजशिष्यै व बिजय राघवाचारिणा यत्प्रलपितमेतादृश बहु अनर्थभिया जीवस्य स्वाभाविक भेदः स्वीकृत इति तन्निरस्तम् भक्षितेपि लशुनेन रोगशान्तिरिति न्यायात् औपनिषदानान्तु आत्मनः व्यावहारिक परिच्छिन्नत्वं नित्य शुद्ध बुद्ध मुक्त स्वरूप

स्य कर्तृत्वादि शून्यस्य परिपूर्णस्य पा
रमार्थिकन्तु अपरिच्छिन्नत्वमित्यनवद्य
म् ।

अस्मच्छास्त्रं युक्ति युक्तं युक्ति हीन
न्तु वैदिकं श्रुति मोहेन जल्पन्ति तेषां
मोहोत्र सूचित: ॥१॥ ग्रन्थोयं ब्रह्म वि
द्याया: पादपद्मे समर्पित: ग्रन्थपुष्पो
पहारेण प्रीता भवतु खेचरी ॥२॥ द
क्षिणे द्रविड़े देशे शारदा पत्तने शुभे
ग्रामे वृहत्तड़ागे तु ब्राह्मण्यकुल सङ्कुले
॥२॥ सुप्रसन्न मुखाम्भोज पार्वती गर्भ
पङ्कजात् शान्त्यादि गुण पूर्णस्य श्री
धर्च्छङ्कर शास्त्रिण: ॥३॥ जात: सद्द
स्तनामाख्यो मुमुक्षु: पुरुषोत्तम: गुरुशु
श्रूषया पश्चाद्य न वै मोक्ष हेतुकी॥४।
वेदान्तागम वित्तेभ्य: शिवरूपेभ्यएवच
श्रीरामानन्द नाथेभ्यो प्राप्ता दीक्षा प

राधुर्वा ॥५॥ सर्वतन्त्र स्वतन्त्रेभ्य: कृत पुण्यफलात्मिके गणपत्यभिधामेभ्योदी क्षितेभ्योमृतप्रदे ॥६॥ वेदान्त योगजे विद्ये प्राप्ते पूज्येभ्य आत्मन: श्री मच्छ्री त्यागराजाख्यैर्दीक्षितैश्शास्त्र मू र्तिभि: ॥७॥ वेदान्तजा पुनर्विद्या पू रिता हृदयांबुजे सोयं हिमालयेद्या पि भिक्षुवेषेण वर्तते ॥८॥ श्रीमच्छ्रीव त्सविद्याया: पादाब्ज कृत मानस: । तेनायंरचितोग्रन्थो मुमुक्षानन्दवर्द्धक:

इतिश्री परमहंस परि व्राजक दाक्षिणात्यस्वामि ना ब्रह्मानन्दतीर्थेन विर चितस्तार्किक मोह प्रका श: संपूर्ण: ॥

विज्ञापन।

—⁂—

निम्न मुद्रित कतिपय पुस्तक जिन महाशयों को अपेक्षित हों दिल्ली महल्ला आमिली चौराहा मन्दिर श्री राधागोपाल जी पण्डित काशी नाथ शर्म्मा से नकद दाम भेजकर वा वेल्यूपेबिल पोष्ट द्वारा मगालें ॥

सदासुखी,तन्दुरस्ती के लिये एकही है ... १)
शैवसुधाकर,शिवमत का सिद्धान्त .... १)
अपरोक्षानुभूति,वेदान्त भाषा टीका सहित-≈)
चतुरसखी,नूतन अतिललित उपन्यास—...।≈)
भण्डारभास्कर-रसोई आदि बनाने की क्रिया≈)
खटमलस्तोत्र-उपहास्य की बहार.........≈)
जैमिनिसूत्र-४ अध्याय सटीक............॥≈)
चम्पाकली-अनेक प्रकार की रागनियां......)
अलबेली का बारह मासा.................≈)
संध्या और तर्पण वैदिक नित्य कर्म्म.........)
मलारतरंगिणी-बड़ेअच्छे२मलार हिंडोले...)
शीक्षामंजरी प्रथमभाग.......................)॥